२द्राक्षायां स्त्री।वीजानाधायके त्रि० "अवीजमपि चेत् क्षेत्रं केवलं स्थण्डिलं भवेत्" मनुः। अप्राशस्त्ये न०त०। अङ्कुरोत्पादनायासमर्थे लैहायणादौ ३वीजे च। "अवीजविक्रयी चैव वीजोत्कृष्टं तथैव च" मनुः। "अवीजं प्ररोहासमर्थमिति" कुल्लू०। वीजं शुक्रं न०ब०। शुक्ररहिते ४क्लीवे न०। "न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति। मेढ्रं चोन्मादशुक्राभ्यां स क्लीव इति कथ्यते" स्मृतेस्तस्य तथात्वम्। "उन्मत्तं पतितं क्लीवमवीजं पापरोगिणम्" इति मनुः। ५कारणशून्ये त्रि०६योगोक्ते निर्वीजे चित्तवृत्तिपरिणामनिरोधे पु०।

**अवीत** न० अनुमानभेदे तच्च दर्शितं सा०कौ० "तच्च प्रथमं तावत् द्विविधं वीतमवीतञ्च अन्वयमुखेन प्रवर्त्तमानं विधायकं वीतम् व्यतिरेकमुखेन प्रवर्त्तमानं निषेधकमवीतम्" व्याख्यातञ्चैतदस्माभिःयथा "वीतं विशेषेण इतं सङ्गतमन्वितम् अन्वयव्याप्तिहेतुकमित्यर्थः यद्वा विशेषेण इतं ज्ञातं प्रसिद्धसाध्यव्याप्तिकमित्यर्थः तद्भिन्नमवीतम् व्यतिरेकव्याप्तिहेतुकम् अप्रसिद्धसाध्यव्याप्तिकं वेत्यर्थः व्यतिरेकमुखेन तदसत्त्वे तदसत्त्वरूपव्यतिरेकद्वारा साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिद्वारेत्यर्थः। निषेधकं यो यः पृथिवीभेदवान् स गन्धाभाववान् इति व्यतिरेकग्रहणेन व्यापकस्य गन्धाभावस्य पृथिव्यां निवृत्त्या पृथिवीभेदरूपस्य गन्धाभावव्याप्यस्य निवारकम्। तथा च पृथिवी पृथिवीतरभिन्ना गन्धवत्त्वादित्यनुमानमवीतम्"।

**अवीर** त्रि०वीरः पुत्रादिर्नास्ति यस्य। १पुत्रादिशून्ये। न०त० २वीर्य्यवद्भिन्ने त्रि०। "पतिपुत्रवती नारी वीरा प्रोक्ता मनीषिभिः" इति परिभाषिता स्त्री वीरा न०त०। ३पतिपुत्ररहितायां स्त्रियां स्त्री। "अजातपुत्रा विधवा साऽवीरा परिकीर्त्तितेति" स्मृतिः। "मा त्वा वयं सहसावन्नवीराः" ऋ०७,४,६,। "अवीराः पुत्रादिरहिताः" भा०। "अवीरायाश्च योषितः" स्मृतिः।

**अवृक** त्रि० वृ—कक् वृकः आवरकः न०ब०। आवरकशून्ये "ज्योतींषि कृण्वन्नवृकाणि" ऋ०१५५,६, "वृकेणावरकेण रहितानि" भा०।

**अवृत्ति** स्त्री वृत्तिर्जीवनोपायः अभावे न०त०। १जीविकाभावे "आददीताममेवास्मादवृत्तावेकरात्रिकम्" अवृत्तिकर्षिता हि स्त्री प्रदुष्येत् स्थितिमत्यपि" अवृत्तिकर्षितः सीदन्निमं धर्म्मं समाचरेत्" इति च मनुः। नास्ति वृत्तिः स्थितिरस्य। २अविद्यमाने। "साध्याभाववद्वृत्तित्वम्" साध्यवदन्यावृत्तित्वम्" इति च अनुचिन्ता०। न०ब०। जीविकाशून्ये त्रि०

**अवृद्धिक** न० नास्ति वृद्धिः यत्र कप्। ऋणादौ वृद्धिः लाभरूपा (सुद) तद्रहिते १मूलधने। तच्च स्मृतौ दर्शितं यथा "ऋणं पैतामहं पैत्रं प्रतिभाव्यागतं सुतः। समं दद्यात् तत्सुतौ च न दाप्याविति निश्चयः"। "समं सवृद्धिकम्" "ऋणमात्मीयवत् पित्र्यं पुत्रैर्देयं विभावितम्। पैतामहं समं देयमदेयं तत्सुतस्य च" या०स्मृ०। "समं यावत् गृहीतं तावद्देयं न वृद्धिः" मिता०। "गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते। नष्टोदेयोविनष्टश्च दैवराजकृताद्दते" या०स्मृ०।

**अवृध** त्रि० न वर्द्धते वृध—क। १वृद्धिशून्ये। अन्तर्भूतण्यर्थे वृध—क न०त०। अवर्द्धके। "पनीरश्रद्धाँ अवृधाँ अयज्ञान्" ऋ०७,७,२, "अवृधान् स्तुतिभिरग्निमवर्द्धयतः" भा०।

**अवृष्टि** स्त्री अभावे न०त०। १वर्षणाभावे "अथ यदाऽवृष्टिर्भवति बलीयानेव तर्ह्यबलीयस आदत्ते धर्म्मा ह्यापः"। शत०ब्रा०। न०ब०। वृष्टिशून्ये मेघे पु०।

**अवृहत्** त्रि० विरोधे न०त०। वृहद्भिन्ने क्षुद्रे स्त्रियां ङीप्

**अवेक्षक** त्रि० अव+ईक्ष—ण्वुल्। १दर्शके २पर्य्यालोचके ३आयव्ययादिषु अध्यक्षे च।

**अवेक्षण** न० अव+ईक्ष—ल्युट्। १दर्शने, २प्रतिजागरणे, ३अवधाने च "वर्णाश्रमावेक्षणजागरूकः" रघुः "भूषाणामङ्गरचना वृथा विष्वगवेक्षणम्"सा०द० "पित्र्यमन्त्रानुहरणे आत्मालम्भे ह्यवेक्षणे" स्मा०त०स्मृ०

**अवेक्षणीय** त्रि० अव+ईक्ष—अनीयर्। १दर्शनीये। "तपस्विसामान्यमवेक्षणीया" रघुः। २आलोचनीये च।

**अवेक्षा** स्त्री अव+ईक्ष—भावे अ। अवेक्षणशब्दार्थे।

**अवेक्षित** त्रि०अव+ईक्ष कर्म्मणि—क्त।१दृष्टे २पर्य्यालोचिते च।

**अवेक्षितृ** त्रि०अव+ईक्ष—तृच् स्त्रियां ङीप्। अवेक्षकशब्दार्थे।

**अवेक्ष्य** त्रि० अव+ईक्ष—कर्म्मणि ण्यत्।१पर्य्यालोच्ये २दृश्ये च ल्यप्। ३दृष्ट्वेत्यर्थे ४पर्य्यालोच्येत्यर्थे च अव्य०।

**अवेदनाज्ञ** त्रि० वेदनां न जानाति ज्ञा—क अस० समा०। वेदनानभिज्ञे "अवेदनाज्ञं कुलिशक्षतानाम्" कुमा०।

**अवेदि** स्त्री वेदिर्वेदनम् अभावे न०त०। ज्ञानाभावे "न चेदवेदिर्महती विनष्टिः" वृ०उ०। परिष्कृतभूमिशून्ये त्रि०

**अवेद्य** त्रि० न वेद्यः ज्ञेयः। १अज्ञेये। विद—लाभे ण्यत्। २अलभ्ये ३अविवाह्यस्त्रियां स्त्री "व्यभिचारेण वर्णानामवेद्यावेदनेन च" मनुः। ४गोवत्से पु० शब्दच०।